# Shri Chandrashekhara Bharati Ashtottara Shatanamavali

# श्रीचन्द्रशेखरभारत्यष्टोत्तरशतनामावलिः

## Document Information

Text title : Chandrashekharabharati Ashtottarashatanamavali

File name : chandrashekharabhAratyashtottarashatanAmAvalI.itx

Category : aShTottarashatanAmAvalI, deities_misc, gurudev, nAmAvalI

Location : doc_deities_misc

Transliterated by : Vasanth Sa gsathyaarumugam at gmail.com

Proofread by : Vasanth Sa gsathyaarumugam at gmail.com

Latest update : January 4, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# श्रीचन्द्रशेखरभारत्यष्टोत्तरशतनामावलिः

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमिशास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥

श्रीशृङ्गपुरपीठेशाय नमः ।
श्रीविद्याजपतत्पराय नमः ।
सुनन्दनाश्वयुक्कृष्णमघक्ष्कैकादशीभवाय नमः ।
प्लवाब्दसितमाघीयपञ्चमीप्राप्तमौञ्जिकाय नमः ।
परीधाविशरच्चैत्रप्राप्ततुर्याश्रमक्रमाय नमः ।
चन्द्रशेखरशब्दाद्यभारत्याख्याविराजिताय नमः ।
शङ्करादिगुरूत्तंसपारम्पर्यक्रमागताय नमः ।
चन्द्रमौलिपदाम्भोजचञ्चरीकहृदम्बुजाय नमः ।
शारदापदपाथोजमरन्दास्वादलोलुपाय नमः ।
सुरत्नगर्भहेरम्बसमाराधनलालसाय नमः । १०
देशिकाङ्घ्रिसमाक्रान्तहृदयाख्यगुहान्तराय नमः ।
श्रुतिस्मृतिपुराणादिशास्त्रप्रामाण्यबद्धधिये नमः ।
श्रौतस्मार्तसदाचारधर्मपालनतत्पराय नमः ।
तत्त्वमस्यादिवाक्यार्थपरिचिन्तनमानसाय नमः ।
विद्वद्वृन्दपरिश्लाघ्यपाण्डित्यपरिशोभिताय नमः ।
दक्षिणामूर्तिसन्मन्त्रजपध्यानपरायणाय नमः ।
विविधार्तिपरिक्लिन्नजनसन्दोहदुःखहृदे नमः ।
नन्दिताशेषविबुधाय नमः ।
निन्दिताखिलदुर्मताय नमः ।
विविधागमतत्त्वज्ञाय नमः । २०
विनयाभरणोज्ज्वलाय नमः ।
विशुद्धाद्वैतसन्देष्ट्रे नमः ।
विशुद्धात्मपरायणाय नमः ।

विश्ववन्द्याय नमः ।
विश्वगुरवे नमः ।
विजितेन्द्रियसंहतये नमः ।
वीतरागाय नमः ।
वीतभयाय नमः ।
वित्तलोभविवर्जिताय नमः ।
नन्दिताशेषभुवनाय नमः । ३०
निन्दिताखिलसंसृतये नमः ।
सत्यवादिने नमः ।
सत्यरताय नमः ।
सत्यधर्मपरायणाय नमः ।
विषयारये नमः ।
विधेयात्मने नमः ।
विविक्ताशासुसेवनाय नमः ।
विवेकिने नमः ।
विमलस्वान्ताय नमः ।
विगताविद्यबन्धनाय नमः । ४०
नतलोकहितैषिणे नमः ।
नम्रहृत्तापहारकाय नमः ।
नम्राज्ञानतमोभानवे नमः ।
नतसंशयकृन्तनाय नमः ।
नित्यतृप्ताय नमः ।
निरीहाय नमः ।
निर्गुणध्यानतत्पराय नमः ।
शान्तवेषाय नमः ।
शान्तमनसे नमः ।
शान्तिदान्तिगुणालयाय नमः । ५०
मितभाषिणे नमः ।
मिताहाराय नमः ।
अमितानन्दतुन्दिलाय नमः ।
गुरुभक्ताय नमः ।
गुरुन्यस्तभाराय नमः ।

गुरुपदानुगाय नमः ।
हासपूर्वाभिभाषिणे नमः ।
हंसमन्त्रार्थचिन्तकाय नमः ।
निश्चिन्ताय नमः ।
निरहङ्काराय नमः । ६०
निर्मोहाय नमः ।
मोहनाशकाय नमः ।
निर्ममाय नमः ।
ममताहन्त्रे नमः ।
निष्पापाय नमः ।
पापनाशकाय नमः ।
कृतज्ञाय नमः ।
कीर्तिमते नमः ।
पापागभिदुराकृतये नमः ।
सत्यसन्धाय नमः । ७०
सत्यतपसे नमः ।
सत्यज्ञानसुखात्मधिये नमः ।
वेदशास्त्रार्थतत्त्वज्ञाय नमः ।
वेदवेदान्तपारगाय नमः ।
विशालहृदयाय नमः ।
वाग्मिने नमः ।
वाचस्पतिसदृङ्मतये नमः ।
नृसिंहारामनिलयाय नमः ।
नृसिंहाराधनप्रियाय नमः ।
नृपाल्यर्चितपादाब्जाय नमः । ८०
कृष्णराजहिते रताय नमः ।
विच्छिन्नहृदयग्रन्थये नमः ।
ऽविच्छिन्नाखिलसंशयाय नमः ।
विद्वच्छिरोभूषणाय नमः ।
विद्वद्वृन्ददृढाश्रयाय नमः ।
भूतिभूषितसर्वाङ्गाय नमः ।
नतभूतिप्रदायकाय नमः ।

त्रिपुण्ड्रविलसत्फालाय नमः ।
रुद्राक्षैकविभूषणाय नमः ।
कौसुम्भवसनोपेताय नमः । ९०
करलग्नकमण्डलवे नमः ।
वेणुदण्डलसद्धस्ताय नमः ।
अप्पवित्रसमन्विताय नमः ।
दाक्षिण्यनिलयाय नमः ।
दक्षाय नमः ।
दक्षिणाशामठाधिपाय नमः ।
वर्णसङ्करसञ्जातसन्तापाविष्टमानसाय नमः ।
शिष्यप्रबोधनपटवे नमः ।
नम्रास्तिक्यप्रवर्धकाय नमः ।
नतालिर्हितसन्देष्ट्रे नमः । १००
विनेयेष्टप्रदायकाय नमः ।
हितशत्रुसमाय नमः ।
श्रीमते नमः ।
समलोष्टाश्मकाञ्चनाय नमः ।
व्याख्यानभद्रपीठस्थाय नमः ।
शास्त्रव्याख्यानकौतुकाय नमः ।
जगतीतलविख्याताय नमः ।
जगद्गुरवे नमः । १०८

श्रीचन्द्रशेखरभारतीमहास्वामिने नमः ।

इति श्रीमज्जगद्गुरु श्रीचन्द्रशेखरभारतीमहास्वामिनां
अष्टोत्तरशतनामावलिः समाप्ता ॥

Encoded and proofread by Vasanth Sa gsathyaarumugam at gmail.com

*Shri Chandrashekhara Bharati Ashtottara Shatanamavali*
pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*